# Uttangakritam 2 Vishnu Stotram

# ઉત્તઙ્ગકૃતં ૨ વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Uttangakritam 2 Vishnu Stotram

File name : uttangakRRitaM2viShNustotram.itx

Category : vishhnu, vishnu, mahAbhArata, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : mahAbhArata | AraNyakaparva | adhyAya 192/11-19||

Latest update : November 2, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 2, 2025

*sanskritdocuments.org*

# ઉત્તઙ્ગકૃતં ૨ વિષ્ણુસ્તોત્રમ્

તસ્ય પ્રીતઃ સ ભગવાન્સાક્ષાદ્દર્શનમેયિવાન્ ।
દૃષ્ટ્વૈવ ચર્ષિઃ પ્રહ્વસ્તં તુષ્ટાવ વિવિધૈઃ સ્તવૈઃ ॥ ૧૦॥

ત્વયા દેવ પ્રજાઃ સર્વાઃ સદેવાસુરમાનવાઃ ।
સ્થાવરાણિ ચ ભૂતાનિ જઙ્ગમાનિ તથૈવ ચ ।
બ્રહ્મ વેદાશ્ચ વેદ્યં ચ ત્વયા સૃષ્ટં મહાદ્યુતે ॥ ૧૧॥

શિરસ્તે ગગનં દેવ નેત્રે શશિદિવાકરૌ ।
નિઃશ્વાસઃ પવનશ્ચાપિ તેજોઽગ્નિશ્ચ તવાચ્યુત ।
બાહવસ્તે દિશઃ સર્વાઃ કુક્ષિશ્ચાપિ મહાર્ણવઃ ॥ ૧૨॥

ઊરૂ તે પર્વતા દેવ ખં નાભિર્મધુસૂદન ।
પાદૌ તે પૃથિવી દેવી રોમાણ્યોષધયસ્તથા ॥ ૧૩॥

ઇન્દ્રસોમાગ્નિવરુણા દેવાસુરમહોરગાઃ ।
પ્રહ્વાસ્ત્વામુપતિષ્ઠન્તિ સ્તુવન્તો વિવિધૈઃ સ્તવૈઃ ॥ ૧૪॥

ત્વયા વ્યાપ્તાનિ સર્વાણિ ભૂતાનિ ભુવનેશ્વર ।
યોગિનઃ સુમહાવીર્યાઃ સ્તુવન્તિ ત્વાં મહર્ષયઃ ॥ ૧૫॥

ત્વયિ તુષ્ટે જગત્સ્વસ્થં ત્વયિ ક્રુદ્ધે મહદ્ભયમ્ ।
ભયાનામપનેતાસિ ત્વમેકઃ પુરુષોત્તમ ॥ ૧૬॥

દેવાનાં માનુષાણાં ચ સર્વભૂતસુખાવહઃ ।
ત્રિભિર્વિક્રમણૈર્દેવ ત્રયો લોકાસ્ત્વયાહૃતાઃ ।
સુરાણાં સમૃદ્ધાનાં વિનાશશ્ચ ત્વયા કૃતઃ ॥ ૧૭॥

તવ વિક્રમણૈર્દેવા નિર્વાણમગમન્પરમ્ ।
પરાભવં ચ દૈત્યેન્દ્રાસ્ત્વયિ ક્રુદ્ધે મહાદ્યુતે ॥ ૧૮॥

ત્વં હિ કર્તા વિકર્તા ચ ભૂતાનામિહ સર્વશઃ ।

આરાધયિત્વા ત્વાં દેવાઃ સુખમેધન્તિ સર્વશઃ ॥ ૧૯॥

ઇતિ મહાભારતે આરણ્યકે ૧૯૨ અધ્યાયાન્તર્ગતં
ઉત્તઙ્ગકૃતં વિષ્ણુસ્તોત્રં સમ્પૂર્ણમ્ ।

મહાભારત । આરણ્યકપર્વ । અધ્યાય ૧૯૨/૧૧-૧૯॥

mahAbhArata . AraNyakaparva . adhyAya 192/11-19..

Proofread by PSA Easwaran

---

*Uttangakritam 2 Vishnu Stotram*
pdf was typeset on November 2, 2025

Please send corrections to *sanskrit@cheerful.com*